श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ षोडशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ षोडशः सर्गः ॥

ऐरावतमथारुह्य श्वेताद्रिमिव जङ्गमम्।
पुरिं द्वारवतीं शौरेराजगाम पुरन्दरः॥ १६.१ ॥

अपत्यभावमापन्नमात्मानममृतोदधेः।
निमेषरहितैः पौरैर्देवभूतैर्निरीक्षितम्॥ १६.२ ॥

अदृश्यं मन्दपुण्यानाममन्दप्रीतिदायिनम्।
आत्तदेहमिव स्वर्गमासेचनकदर्शनम्॥ १६.३ ॥

महनीयपरिष्कारं वल्गुध्वजमतल्लिकम्।
महोत्सवमिवाशानामाशाभ्यधिकसम्पदम्॥ १६.४ ॥

उदधेरिव मन्थेन पीडितस्य समुत्थितैः।
दृढलग्नैरिवोत्पत्तौ दीप्तं शोणितबिन्दुभिः॥ १६.५ ॥

दैत्यदानवदर्पघ्नैर्दन्तैर्दलितमन्दरैः।
सिंहानामपि हन्तारं सिंहवक्त्रविभूषणैः॥ १६.६ ॥

मेरुकल्पेन रूपेण मेदिनीधृतिहेतुना।
त्रिदशप्रीतिदातारं स्त्यानसिन्दूरधातुना॥ १६.७ ॥

मूर्ध्ना विपुलतुङ्गेन मेनकास्तनबन्धुना।
दधतं मौक्तिकाकल्पं गङ्गाबुद्बुदनिर्मलम्॥ १६.८ ॥

अजहद्भृङ्गगीतेन गर्जाडम्बरशोभिना।
स्वकान्त्या कर्णतालेन क्लृप्तसङ्गीतखेलनम्॥ १६.९ ॥

नर्तयन्तममर्त्यानां नेत्रकौतुकसूतिकाम्।
नासां त्रिदशनारीणामूरुनिर्माणमातृकाम्॥ १६.१० ॥

मङ्गलत्वमिवेच्छद्भिर्हेमशङ्खदिमण्डनैः।
आश्रितं रत्नपूर्णेन कुम्भेन च महीयसा॥ १६.११ ॥

विभूतिशरदम्भोदैः कीर्तिवल्लीगुलुच्छकैः।
कान्तिसागरकल्लोलैः सपक्षमिव चामरैः॥ १६.१२ ॥

सहजं प्रभया चन्द्रं वारुणीं मदसम्पदा।
सूचयन्तं स्वमूर्त्या च सुधां शुद्धानुभाव्यया॥ १६.१३ ॥

जगदामोदजनकं दानार्द्रकरपुष्करम्।
दभ्रयन्तमिवौदार्याद्दिव्यपादपसम्पदम्॥ १६.१४ ॥

उदग्रबहुदन्तांशुं बृंहितव्याप्तदिङ्मुखम्।
हसन्तमिव दिङ्नागानन्यानतिबलानपि॥ १६.१५ ॥

उद्वहन्तं कदलिकां काञ्चनीं किङ्किणीफलाम्।
वप्राभिघातभीतस्य सुमेरोरुपदामिव॥ १६.१६ ॥

चित्रकम्बलसञ्छन्नं कान्तं कनककक्ष्यया।
विद्युतेव परिष्वक्तं वासरान्तशरद्घनम्॥ १६.१७ ॥

अवधिं दर्शनीयानामाकल्पमनघं दिवः।
जीवातुं देवसैन्यानां दर्पभङ्गं विरुन्धताम्॥ १६.१८ ॥

घण्टायुगलनादेन नगेन्द्रेष्वनुनादिना।
क्षरन्तममृतक्ष्वेलौ कर्णेष्वमरतद्द्विषाम्॥ १६.१९ ॥

महता मदगन्धेन तस्य विघ्ना विबभ्रमुः।
उत्खातविपुलस्तम्भा नागास्त्रुटितशृङ्खलाः॥ १६.२० ॥

स तं द्वारवतीद्वारे समवस्थाप्य सानुगम्।
आससाद हरेः स्थानमवज्ञातत्रिविष्टपम्॥ १६.२१ ॥

शुभानामिव साम्राज्यं श्वेतद्वीपमिवापरम्।
निवेदितसमाहूतः प्रासादं प्राविशत् प्रभोः॥ १६.२२ ॥

स तेन विहितां शक्रः प्रतिगृह्य प्रियार्हणाम्।
निजगाद निजां भीतिं गद्गदोद्गमया गिरा॥ १६.२३ ॥

दयनीयेषु देवेषु देवदेव त्वयाऽधुना।
अपाङ्गाः परिपात्यन्तामनुक्रोशानुवर्तिनः॥ १६.२४ ॥

सुषुवे नरसिंहं त्वां भक्तप्रह्लादसम्मुखम्।
रक्षार्थमिह दीनानां रत्नस्थूणेव देवकी॥ १६.२५ ॥

नाथ त्वयि निराबाधं त्रिलोकीं त्रातुमागते।
नरको नाम दैत्येन्द्रः कदर्थयति नाकिनः॥ १६.२६ ॥

धर्मसूकररूपस्य तवासौ क्षमयाऽन्वये।
उत्पात इव भूतानामुद्बभूव भयानकः॥ १६.२७ ॥

जननी सर्वभूतानां पत्नी तव वसुन्धरा।
प्रसूय नरकं देवी दूयते त्वदुपेक्षया॥ १६.२८ ॥

न हिरण्यहिरण्याक्षौ न मधुर्न च कैटभः।
उपमानपदे तस्य त्वच्छक्तिजनितात्मनः॥ १६.२९ ॥

एष कल्पान्तवृत्तान्तमिदानीन्तनयन्निव।
विधुनोति त्वदालम्बं ब्रह्मस्तम्बमिदम्परः॥ १६.३० ॥

विक्रमस्रोतसा तस्य बृहन्त्यपि बलानि नः।
सहसा भेदमायान्ति सैकता इव सेतवः॥ १६.३१ ॥

यदृच्छोपगमेऽप्यस्य यान्ति देवगृहाश्रिताः।
प्रधावितुमनीशानाः साक्षितां सालभञ्जिकाः॥ १६.३२ ॥

महता मत्प्रयुक्तेन वज्रेण ज्वलितात्मना।
निलिल्ये तस्य दोर्मध्ये निष्काभरण वर्ष्मणा॥ १६.३३ ॥

त्वत्कोप इव दीप्तोऽपि ज्वलनो न प्रकाशते।
ज्योतिरिङ्गणवत्तस्य द्युमणेरिव सन्निधौ॥ १६.३४ ॥

अमोघत्वयशोभङ्गभयादिव निवर्तते।
अखण्डितबले तस्मिन् दण्डो दण्डधरार्पितः॥ १६.३५ ॥

नयनार्चिष्मतस्तस्य नैर्ऋतेश्वरवाहिनी।
अपसृप्य पुरोभागादद्यापि न निवर्तते॥ १६.३६ ॥

तं सुप्तमपि वा मत्तं वारुणो वैरिदारुणः।
न रोद्धुं क्षमते पाशो नलस्तम्ब इव द्विपम्॥ १६.३७ ॥

शक्तः शमयितुं तस्य संवर्तार्हजवोऽपि सन्।
नभस्वान् खेलतः सङ्ख्ये न स्वेदकणिकामपि॥ १६.३८ ॥

धनदेन गदा तस्य महती मूर्ध्नि पातिता।
अभित्त्वा पौष्पमापीडमनापीडत्वमादधे॥ १६.३९ ॥

जटिलान् कृत्तिवसनान् नियमं तीव्रमास्थितान्।
तपस्विन इति ज्ञात्वा स रुद्रान्नातिवर्तते॥ १६.४० ॥

अहरद्वारुणं छत्रं मामकं मणिभूधरम्।
अमृतस्यन्दिनी चास्मज्जनन्या मणिकुण्डले॥ १६.४१ ॥

आदर्शमिव सम्पत्तेरमृताब्धेरिवाशयम्।
औपवाह्यमसौ मत्कमारुरुक्षति साम्प्रतम्॥ १६.४२ ॥

देवदानवसिद्धानां नृपाणामपि कन्यकाः।
अपहृत्य त्वदेकार्हास्त्वरते पाणिपीडने॥ १६.४३ ॥

स भौमस्त्वन्निरस्तानां समवाय इवोत्थितः।
बाधते विबुधानेवं बलवीर्यपराक्रमैः॥ १६.४४ ॥

तदेवमवसीदत्सु दया देवेषु पात्यताम्।
अनपह्नुतदास्यानां दोषनिह्नवसाक्षिणी॥ १६.४५ ॥

तमर्धं भूमिभारस्य त्वयैवोत्पादितं प्रभो।
त्रिलोकीकण्टकं तीक्ष्णं त्वमेवोद्धर्तुमर्हसि॥ ४६ ॥

निवर्त्ये धर्मशल्येऽस्मिन् निदाने सर्वपाप्मनाम्।
निवेदनमिहास्माकमंशो निर्वहणं त्वयि॥ १६.४७ ॥

मशकामर्शवद्यस्य मधुकैटभमर्दनम्।
तदन्यदनुजध्वंसे तस्य ते किमिवाद्भुतम्॥ १६.४८ ॥

निगमान्तेषु निगदव्याख्यातनिजवैभवः।
विधत्स्व विपदुत्तीर्णानमर्त्याननुकम्पया॥ १६.४९ ॥

इति विज्ञापितोदन्तं दत्तहस्तं बलद्विषम्।
विनिवर्त्य जगन्नाथो वैनतेयमथास्मरत्॥ १६.५० ॥

अनुचिन्तितमात्रस्तमुपतस्थे खगेश्वरः।
अहीन्द्रदामभिर्भीमैरंसलम्बिभिरंसलः॥ १६.५१ ॥

पक्षमारुतघोषेण त्रैलोक्यदुरितच्छिदा।
चतुर्णामिव वेदानां सम्भूतिमिव भावयन्॥ १६.५२ ॥

तरुणार्कप्रभासारसामरस्यजुषा त्विषा।
तप्तहेमद्रवौघेन लिम्पन्निव दिशो दश॥ १६.५३ ॥

स्वामिदर्शनसन्तोषात् प्रहृष्यद्भिस्तनूरुहैः।
युगान्तसन्ध्याजलदः तटिज्जालैरिव ज्वलन्॥ १६.५४ ॥

विपुलाद्भुतसंस्थानैर्द्योतितो दिव्यभूषणैः।
भुजगेन्द्रफणारत्नशङ्कार्हमणिचित्रितैः॥ १६.५५ ॥

तुङ्गवज्रव्रणाङ्केन सुविस्तीर्णेन वक्षसा।
अबहिर्भावयन् कृत्स्नमवकाशं विहायसः॥ १६.५६ ॥

पृथुना भुजयुग्मेन भोगीन्द्रपरिकर्मणा।
मन्दरद्वितयेनेव समेतो रुक्मपर्वतः॥ १६.५७ ॥

व्यालखण्डनसङ्क्रान्तविषपङ्ककलङ्किना।
दधान इव तुण्डेन दैत्यदर्पगजाङ्कुशम्॥ १६.५८ ॥

तक्षकश्रोणिसूत्रेण दृढबद्धेन बन्धुरम्।
मान्यमग्रजवर्णेन वसानो दिव्यमम्बरम्॥ १६.५९ ॥

नाथभक्तिपरिष्कार्यां नृत्तलीलामिव स्पृशन्।
निजेन स्थानकेनाग्रे निहितोन्नतजानुना॥ १६.६० ॥

वपुषा भक्तिनम्रेण धीरोन्नतमहीयसा।
शान्तवीराद्भुतरसान् समाहृत्येव सम्पतन्॥ १६.६१ ॥

मूर्तिमानिव संरम्भो रूपवानिव मारुतः।
तरङ्गान् पक्षतीकृत्य सङ्क्षिप्त इव सागरः॥ १६.६२ ॥

संवर्त इव नागानां सङ्घात इव रंहसाम्।
वालखिल्यचरित्राणां विपाक इव जङ्गमः॥ १६.६३ ॥

प्रभुस्तं दैत्यसिद्धीनां प्रसूतकिलकिञ्चितम्।
ओलण्डितमिवापश्यदुग्रं समरताण्डवम्॥ १६.६४ ॥

दत्तनीराजनस्तेन ददृशे वाहनेश्वरः।
प्रदक्षिणीकृतः शश्वत् प्रतापविजयश्रिया॥ १६.६५ ॥

स तदाऽऽस्फोटयामास विन्ध्यमेरुसमौ भुजौ।
रुद्रया च सुकीर्त्या च मृदितौ कण्ठभूषणैः॥ १६.६६ ॥

दुधुवे पक्षती च द्वे डोलायितकुलाचले।
वीजयन् घोरदुर्वादिघर्मतप्तामिव त्रयीम्॥ १६.६७ ॥

मुहुराम्रेडयामास जयालोकयभारतीम्।
मुग्धमध्यप्रगल्भाभिर्दशाभिः कर्बुरामिव॥ १६.६८ ॥

स तदा सन्नतस्कन्धो बद्धाञ्जलिरनिःश्वसन्।
मुमुदे मूर्ध्नि संस्पृष्टो मुकुन्देन प्रसेदुषा॥ १६.६९ ॥

तस्मिन् प्रथममारोप्य सत्यां विरहविक्लबाम्।
आरुरोह ततः शौरिराखण्डलकृतस्तुतिः॥ १६.७० ॥

निवर्त्य स्वनिवासाय शक्रं शमितसाध्वसम्।
प्रययौ दीप्तसन्नाहः प्राग्ज्योतिषपुरं प्रभुः॥ १६.७१ ॥

श्रेयःपरिपणं तस्य श्रुतिश्रेणिशिरोधृतम्।
प्रणतः परिजग्राह शासनं पाकशासनः॥ १६.७२ ॥

यथास्वं नगरद्वारे यादवा दानवाश्च तम्।
तरस्विगरुडारूढं सत्यमैक्षन्त तत्क्षणम्॥ १६.७३ ॥

समन्ताद्वैरिदुर्गस्य क्षिप्तचक्रः क्षणेन सः।
क्षुरान्तानच्छिनत्पाशानाततांश्छतयोजनम्॥ १६.७४ ॥

मुरं पञ्चजनं सप्तसहस्राणि मुरोद्भवान्।
शलभीकृत्य चक्राग्निरुपदुद्राव तत्पुरम्॥ १६.७५ ॥

ततः प्राग्ज्योतिषद्वारे दैत्यदानवसूदनः।
पाञ्चजन्यमुपादध्मौ प्रलयाम्बुधिनिस्वनम्॥ १६.७६ ॥

वीक्ष्य तं विविशुर्दुर्गं दिवाभीता इवासुराः।
उद्यन्तमिव तिग्मांशुमुदयाद्रौ गरुत्मति॥ १६.७७ ॥

अभिमानोदित व्यक्तिरहङ्कार इवोल्बणः।
महतो दैत्यनगरान्निरगान्नरकासुरः॥ १६.७८ ॥

तमस्त्रमायाभ्यधिका दानवाः पर्यवारयन्।
प्रकटच्छन्नकौटिल्याः पाषण्डमिव हैतुकाः॥ १६.७९ ॥

संयुगे रजसोद्रिक्ते तस्मिन् सत्त्वतमस्त्विषोः।
अर्थिप्रत्यर्थिनोरासीदनभिव्यक्तरूपता॥ १६.८० ॥

शरधारासहस्रेण छादयन्नरको दिशः।
स्वहेतुमभिसम्पेदे समुद्रमिव तोयदः॥ १६.८१ ॥

नरकाम्बुदमुक्ताभिर्नाथो नाराचवृष्टिभिः।
विपद्भिरिव तद्भक्तो विषमाभिर्न विव्यथे॥ १६.८२ ॥

दृप्यतामथ दैत्यानां ध्वनिरुत्कम्पयन् दिवम्।
पाञ्चजन्यप्रणादेन पर्यभूयत भूयसा॥ १६.८३ ॥

दिदृक्षोपगतानां तद्देवानां रोमहर्षणम्।
अदीव्यत रणद्यूतमन्तरस्थयशःपणम्॥ १६.८४ ॥

प्रतिविव्याध दैतेयं बाणैरशनिभीषणैः।
पक्षवन्तमिवाद्रीन्द्रं प्रकुप्यन् पाकशासनः॥ १६.८५ ॥

शरसंहतयस्तस्य क्षरन्त्यः शार्ङ्गशैलतः।
द्विधा चक्रुः स्ववेगेन द्विषद्बलमहार्णवम्॥ १६.८६ ॥

तस्य ज्यास्वनगीतानि समयुज्यन्त संयुगे।
करिणां कर्णतालैश्च कबन्धानां च ताण्डवैः॥ १६.८७ ॥

दैत्यशोणितदिग्धाभिः तद्बाणततिभिर्नभः।
रुरुधे रोषताम्राभिः कृतान्तस्येव दृष्टिभिः॥ १६.८८ ॥

द्विरदाः शरनिर्भिन्नकुम्भनिर्मुक्तमौक्तिकाः।
क्षरन्तः करकासारं कल्पमेघा इवाबभुः॥ १६.८९ ॥

नासावालधिभिर्नागाः क्षरन्तो रक्तनिर्झरान्।
शशंसुर्लाघवं तस्य निष्पत्राकृतसायकम्॥ १६.९० ॥

अग्रिमं विशतां स्कन्धमामूलमहितां चमूम्।
शराणां तस्य सन्धाननिपातौ न द्विषोऽविदुः॥ १६.९१ ॥

लक्ष्यमेकमभूत्तस्य शराणामुत्पलत्विषाम्।
अमरस्त्रीकटाक्षाणामप्यभङ्गुरधन्वनः॥ १६.९२ ॥

चिरप्रार्थितभीतानां स तासामेव शात्रवान्।
स्वयंवरपतींश्चक्रे सुधन्वा सुरसुभ्रुवाम्॥ १६.९३ ॥

त्यक्त्वा भीतिवृतांस्तत्र विमुक्तान् जीविताशया।
सार्धमप्सरसः कीर्त्या वीरान् स्वयमवृण्वत॥ १६.९४ ॥

अनन्तस्य तदाऽनन्तैरसुरैराहवोत्सवः।
जयश्रियं च सत्यां च सम्मते समतोषयत्॥ १६.९५ ॥

स्वबाधनियतस्तत्र परबाधाभिलाषिणाम्।
प्रयासः सुरशत्रूणां जात्युत्तरमिवाभवत्॥ १६.९६ ॥

विसन्धिविग्रहाः क्षिप्तयानासनसमाश्रयाः।
द्वैधीभावसृजो योधा दुर्नयस्था इवाभवन्॥ १६.९७ ॥

अनघव्यवसायानामसङ्गत्यक्तवर्ष्मणाम्।
योगिनामिव तत्रासीदपरावर्तना गतिः॥ १६.९८ ॥

तनुं तत्र मुकुन्देन त्याजितान् महती स्वयम्।
अवृणोदनघा कीर्तिरधिविन्नाप्सरोगणान्॥ १६.९९ ॥

निः सहायीकृतस्तत्र शरवर्षैर्धरासुतः।
बह्वमन्यत तेनैव द्वन्द्वयुद्धमुपस्थितम्॥ १६.१०० ॥

कृतप्रतिकृतैरस्त्रप्रयोगैः क्रीडतोस्तयोः।
अदृष्टान्तमभूद्युद्धमन्यदृष्टान्तवर्जितम्॥ १६.१०१ ॥

वक्रवृत्तिः सरुधिरो लोहिताङ्गो महीसुतः।
प्राप्य यादवभास्वन्तं मूढः समभवत् क्रमात्॥ १६.१०२ ॥

स्वायुधैकसहायस्तु देवः स्वच्छन्दयादवः।
निरयापरपर्यायं रिपुं चक्रे निरायुधम्॥ १६.१०३ ॥

क्रोधरक्ततनुर्दैत्यः क्षरच्छोणितनिर्झरः।
गृहीतपादसञ्चारो गैरिकाद्रिरिवाबभौ॥ १६.१०४ ॥

निशितैस्तस्य नाराचैर्निर्भिन्नरथसारथिः।
आस्फोटितभुजस्तार्क्ष्यमजिघांसदमर्त्यजित्॥ १६.१०५ ॥

निसर्गतमसस्तस्य जिह्मगस्याङ्गमुत्तमम्।
रथपादेन चिच्छेद राहोरिव रमापतिः॥ १६.१०६ ॥

उदतिष्ठत हाकारस्ततो युगपदेकधा।
देवदानवसौधेभ्यो हर्षशोकसमुद्भवः॥ १६.१०७ ॥

स्फुरद्भ्रुकुटि दैत्यस्य रोषदष्टाधरं मुखम्।
निकृत्तमपि न द्रष्टुं प्रबभूवुर्दिवौकसः॥ १६.१०८ ॥

निकृत्तशिरसं देवी निजाङ्के पतितं सुतम्।
महती मेदिनी दीनं कम्पमानाऽन्वकम्पत॥ १६.१०९ ॥

अथ सा दैत्यहन्तारं प्रणम्य नतजीवितम्।
अयाचत दयासिन्धुमात्मजस्य शुभां गतिम्॥ १६.११० ॥

तुष्टाव च पतिं तुष्टा मेदिनी विश्ववेदिनी।
स्नपयन्तीव संयत्तं दन्तदीधितिगङ्गया॥ १६.१११ ॥

अहमस्मि विभूतिस्ते भूतधात्री त्वया धृता।
अशेषाधारमेकं त्वामनाधारमधीयते॥ १६.११२ ॥

तिसृभिः शक्तिभिर्युक्तं षाड्गुण्यप्रथितोदयम्।
अधिराजमशेषस्य जगदुस्त्वां जिताहितम्॥ १६.११३ ॥

अपि कोटिमुखैः सर्वैरनन्तेनाप्यनेहसा।
नाथ त्वद्गुणदुग्धाब्धि पृषदास्वादनं क्षमम्॥ १६.११४ ॥

अकर्तुमन्यथाकर्तुं कर्तुमप्यखिलं क्षमम्।
लक्ष्मीलक्षणमाहुस्त्वां लङ्घितत्रिविधावधिम्॥ १६.११५ ॥

स्थिरत्रसविभक्तं ते चिदचिद्भेदचित्रितम्।
स्वसृष्टमिदमुद्यानं त्वदन्यो नास्ति रक्षितुम्॥ १६.११६ ॥

स्वातन्त्र्यपरतन्त्रस्त्वं पारतन्त्र्यस्वतन्त्रितैः।
विहरस्यात्मसूत्रस्थैः शकुनैरिव जन्तुभिः॥ १६.११७ ॥

सितासितगुणारब्धैः पाशजालैर्दुरत्ययैः।
निबद्धाः पशवो नाथ त्वदेकाधीनमुक्तयः॥ १६.११८ ॥

यस्य त्वं यश्च हृद्यस्ते यस्यासौ तस्य यस्तथा।
नाथ त्वत्पदमारुह्य न पुनस्तैर्निवृत्यते॥ १६.११९ ॥

सुरासुरविभागोऽयं तुलाग्रन्यायतस्त्वया।
कल्पितः कालपर्यायान्निम्नोन्नतसमक्रमः॥ १६.१२० ॥

कस्त्वदङ्गीकृतं हन्ता कस्त्राता त्वज्जिघांसितम्।
निहंसि पासि चैकस्त्वं स्वेन विश्वं परेण वा॥ १६.१२१ ॥

वृद्धिसङ्कोचविषमा गतागतसहायिनी।
नियतिः केन लङ्घ्येत निजच्छायानुकारिणी॥ १६.१२२ ॥

न पुत्रवधमन्वीक्ष्य न दूये त्वन्मतस्थिता।
न च पुत्राभिमानो मे मत्प्रसूतेषु जन्तुषु॥ १६.१२३ ॥

सूदने कृतसङ्कल्पः स्वभक्तपरिपन्थिनाम्।
यदि तीर्णप्रतिज्ञस्त्वं किं मयेदं न मृष्यते॥ १६.१२४ ॥

त्वन्मायाजृम्भितैर्देव ब्रह्माण्डैरपि लीयते।
जन्मन्यपि सुरोधेषु जन्तुवर्गेषु का कथा॥ १६.१२५ ॥

त्वत्प्रसूतस्त्वयैवासौ वधितश्चक्रधारया।
का नाम कृतिनस्तस्य परिदेवयितव्यता॥ १६.१२६ ॥

निरुद्धे नरके नाथ नित्यधर्मात्मना त्वया।
निष्प्रतिद्वन्द्विकं स्वर्गसुखमास्वाद्यतां सुरैः॥ १६.१२७ ॥

निर्यातितमिदं भूयः त्वज्जनन्यै मया स्वयम्।
श्रवणाभरणद्वन्द्वं शीतलार्कयुगप्रभम्॥ १६.१२८ ॥

इति विज्ञाप्य सा तस्मै विषादाभावमात्मनः।
विरराम ततो देवी विलक्षा विश्वधारिणी॥ १६.१२९ ॥

तामशेषजगद्धात्रीं सन्नताङ्गीमसान्त्वयत्।
सहधर्मचरीं पूर्वां वासुदेवो वसुन्धराम्॥ १६.१३० ॥

पुरस्कृतप्रसादस्तां पूर्वसम्भवगेहिनीम्।
गृहीतकुण्डलो गन्तुमन्वमंस्त गदाग्रजः॥ १६.१३१ ॥

ततः सा तत्समादेशात् सत्यभामाभिवन्दिता।
रम्यं प्रतिययौ स्थानं रत्नसानुशिखण्डकम्॥ १६.१३२ ॥

ददर्श यदुवीरोऽथ दैत्यवीरनिवेशनम्।
अचिन्त्यमिव मायानां प्रभावमनुपप्लवम्॥ १६.१३३ ॥

विचक्षणवरं दैत्यं वैरिसम्पत्करग्रहे।
विभूतिसञ्चयप्रेक्षी बह्वमंस्त बलानुजः॥ १६.१३४ ॥

सुधानिष्यन्दिभिः स्थूलैः मुक्तादामभिरावृतम्।
पश्यन् पाशभृतश्छत्रं विश्वकर्ता विसिष्मिये॥ १६.१३५ ॥

निदध्यौ कन्यकास्तत्र निदर्शितपरस्पराः।
अमुद्राभङ्गसुभगा नीवीरिव रतेः शुभः॥ १६.१३६ ॥

लावण्यजलधौ लक्ष्म्याश्छाया इव सहोदिताः।
मधुस्वच्छन्दतासीम्नो मान्मथीरिव दीर्घिकाः॥ १६.१३७ ॥

कामकीर्तिपताकाभिः स ताभिः प्रत्यवेक्षितः।
आत्मानममृतोदन्वदन्तः स्थितममन्यत॥ १६.१३८ ॥

सुप्रभातमभूत्तासां सुदिनं च तमोपहम्।
भवदोषार्यमा यासां देवो दृष्टिपथं गतः॥ १६.१३९ ॥

रत्नशैलनिभांस्तस्य भुजान् कटकभूषितान्।
उपधास्यन्ति यास्तासां श्रेयसी भवितव्यता॥ १६.१४० ॥

सर्वस्वमिव पुण्यानां साम्राज्यमिव सम्पदाम्।
समाजमिव सिद्धीनां स तद्यौवतमग्रहीत्॥ १६.१४१ ॥

भुजमन्दरवेगेन चक्रभ्रमवता विभुः।
मथिताद्दानवाम्भोधेरमृतं तदविन्दत॥ १६.१४२ ॥

मणिपरुवकसम्पन्माननीयस्तनीनां
मनसिजवपुषेव स्वेन सङ्कल्पितानाम्।
सकलजगदभिख्यासारसीम्नां स तासां
स्वयमजुषत सिद्धिं स्वप्रसादाप्रसूताम्॥ १६.१४३ ॥

पुरमथ गमयित्वा भूषितं यादवाग्र्यैः
शतसमधिकसङ्ख्यं षोडशस्त्रीसहस्रम्।
अवनितनयभीतान् प्रीणयन्नादितेयान्
परिणयनविलम्बं पद्मनाभः प्रसेहे॥ १६.१४४ ॥

दिवि भुवि च समिद्धं दीपरूपेण रूढैः
त्रिभुवनविभवानामङ्कुरैरेकरूपैः।
जनितनिगमसख्यं दानवीनां विलापैः
नरकवधदिनं तन्नाथपूजार्हमासीत्॥ १६.१४५ ॥

ऐरावतप्रतिनिधीनथ षड्सहस्रं
स्तम्बेरमान् पृथुलदन्तचतुष्कभाजः।
काम्भोजवाजिनियुतानि च सत्रिसप्ता-
न्यभ्यानयन्निजपुरं नरकस्य भृत्यैः॥ १६.१४६ ॥

उद्गम्य दुर्गजलधेरुदयाद्रिकल्पं
तुङ्गं विहङ्गमपतिं त्वरयाऽधिरोहन्।
उल्लासहेतुरभवद्यदुवीरभास्वान्
वैमानिकप्रणयिनीवदनाम्बुजानाम्॥ १६.१४७ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
षोडशः सर्गः ॥